# Suryatapinyupanishad

# સૂર્યતાપિન્યુપનિષત્

## Document Information

Text title : sUryatApinyupaniShat

File name : sUryatApinyupaniShat.itx

Category : upanishhat, vedanta, upanishad

Location : doc_upanishhat

Proofread by : Sunder Hattangadi

Description-comments : aprakAshitA upaniShadaH

Latest update : October 18, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2021

*sanskritdocuments.org*

# સૂર્યતાપિન્યુપનિષત્

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

પ્રથમઃ પટલઃ

ૐ અથ ભગવન્તં કમલાસનં ચતુર્મુખં પિતરં બ્રહ્માણં સનત્કુમાર
ઉપસસાર । પ્રણનામાહં ભો ઇતિ । અધીહિ ભો ઇતિ પપ્રચ્છ । કો મનુઃ ।
દિવ્યં કિં ધ્યેયમ્ । યજ્જપાત્સર્વૈનોનિવૃત્તિઃ । યદ્ધ્યાનાત્સારૂપ્યસિદ્ધિઃ
તદ્બ્રવીતુ ભગવાન્ લોકાનુગ્રહાયેતિ । તચ્છ્રુત્વા પિતામહ આહ –
શ્ૃણોતુ ભવાનેકમનાઃ સર્વદા યમામનન્તિ યન્નમસ્યન્તિ દેવાઃ
સ બ્રહ્મા સ શિવઃ સ હરિસ્સેન્દ્રઃ સોઽક્ષરઃ પરમઃ સ્વરાટ્ સ
સૂર્યો ભગવાન્ સહસ્રાંશુઃ તં સૂર્યં ભગવન્તં સર્વસ્વરૂપિણં
નિગમા બહુધા વર્ણયન્તિ । કશ્યપઃ પશ્યકો ભવતિ । યત્સર્વં
પરિપશ્યતીતિ સૌક્ષ્મ્યાત્ । કશ્યપાદુદિતાઃ સૂર્યાઃ પાપાન્નિર્ઘ્નન્તિ
સર્વદા । રોદસ્યોરન્તર્દેશેષુ । અપૈતં મૃત્યું જયતિ । ય એવં વેદ ।
યોઽસૌ તપન્નુદેતિ । અસૌ યોઽસ્તમેતિ । અસૌ યોઽક્ષીયતિ । એષ હિ દેવઃ
પ્રદિશોઽનુસર્વાઃ પૂર્વો હિ જાતઃ સ ઉ ગર્ભે અન્તઃ । સ વિજાયમાનઃ સ
જનિષ્યમાણઃ પ્રત્યઙ્મુખાસ્તિષ્ઠતિ વિશ્વતોમુખઃ । અસૌ યોઽવસર્પતિ
નીલગ્રીવો વિલોહિતઃ । ઉતૈનં ગોપા અદૃશન્નદૃશન્નુદહાર્યઃ । ઉતૈનં
વિશ્વા ભૂતાનિ સ દૃષ્ટો મૃડયાતિ નઃ । ઋગ્ભિઃ પૂર્વાહ્ણે દિવિ દેવ
ઈયતે । યજુર્વેદે તિષ્ઠતિ મધ્યે અહ્નઃ । સામવેદેનાસ્તમયે મહીયતે ।
વેદૈરશૂન્યસ્ત્રિભિરેતિ સૂર્યઃ । ઋગ્ભ્યો જાતાં સર્વશો મૂર્તિમાહુઃ ॥

એષ બ્રહ્મા ચ વિષ્ણુશ્ચ રુદ્ર એષ હિ ભાસ્કરઃ ।

ત્રિમૂર્ત્યાત્મા ત્રિવેદાત્મા સર્વદેવમયો રવિઃ ॥ ઇતિ ।

યોગેન ઊર્ધ્વમન્થિનઃ સૂર્યં ભગવન્તમુપાસતે ।
ધનધાન્યબહુરત્નવન્તો નિર્વ્યાધિવન્ત આયુષ્યવન્ત આરોગ્યવન્તો
રયિવન્તો ધનવન્તો બલવન્તો બહુપુત્રવન્ત ઇતિ । યઃ શ્રીકામઃ
શાન્તિકામઃ તુષ્ટિકામઃ પુષ્ટિકામો મેધાકામઃ પ્રજ્ઞાકામ આયુષ્કામ
આરોગ્યકામોઽન્નાદ્યકામો ભાસ્કરં ભગવન્તમુપાસીત । સયોનિઃ
સરૂપતાં સલોકતાં ગત્વા સ્તુત્વા મહાનન્દમુદકમુપસ્પૃશ્યાપોઽવગાહ્ય
વાગ્યતઃ નિત્યકર્મ કૃત્વા શુચૌ દેશેઽપ્યાસીનો દર્ભાન્ ધારયમાણઃ
પ્રાઙ્મુખ ઉપવિશ્ય પ્રાણાનાયમ્ય દેશકાલૌ સઙ્કીર્ત્ય ત્રિવેદમયં
ત્રિમૂર્તિં ત્રિગુણં ચતુષ્પદં પઞ્ચરૂપં ષડર્ણવેદ્યં
સપ્તાશ્વમષ્ટશાપેતિ (?) મુદયાદ્રિસમારૂઢમુદયન્તં
પદ્મકરં પદ્માસનં પદ્મનયનં પદ્મબાન્ધવં દિવ્યામ્બરધરં
દિવ્યગન્ધાનુલેપનં સર્વાભરણભૂષિતં સર્વવેદસં
સર્વદેવાધિદૈવતં સર્વદેવનમસ્યન્તં કાશ્યપં ભાસ્કરં ધ્યાત્વા
પ્રસ્કણ્વઃ કણ્વપુત્રો મુનિરસ્ય છન્દોઽનુષ્ટુબ્ભાસ્કરો દ્વાદશાત્મકો
દૈવતમુદાત્તસ્વરો જ્ઞાનં નેત્રં સૂર્યસ્તત્ત્વં પ્રથમં બીજં દ્વિતીયં
શક્તિસ્તૃતીયં કીલકમથાપિ શ્રીંબીજં શક્તિઃ સૂર્ય ઇતિ કીલકમ્
। અથ પાદાદ્યૈરર્ધર્ચૈઃ રૃગ્ભિસ્તૃચેન દ્વાદશભિર્નામભિઃ
મિત્રરવિસૂર્યભાનુખગપૂષહિરણ્યગર્ભમરીચ્યાદિત્યસવિત્રર્કભાસ્કરાખ્યૈઃ
ષડ્બીજૈઃ સમ્પુટિતાઃ । સ્તસ્ય સિધ્યન્તિ । ગચ્છેદન્તે પરં પદમ્ ॥

પ્રોક્તમાદિત્યમાહાત્મ્યં યન્માં ત્વમનુપૃચ્છસિ ।
પ્રત્યક્ષદૈવતં ભાનુઃ પરોક્ષં સર્વદેવતાઃ ॥

તદ્ધ્યાનં પૂજનં કાર્યં શ્રેયસ્કામૈર્જિતેન્દ્રિયૈઃ ।
જિતેન્દ્રિયાય શાન્તાય મન્ત્રં દેયમિદં મહત્ ॥

ન દેયં ચઞ્ચલાક્ષાય નાભક્તાય કદાચન ।
હસન્તિ લોકાયતિકા હસન્તિ કુટિલા જનાઃ ॥

તસ્માદ્ગોપ્યં પ્રયત્નેન ન દેયં યસ્ય કસ્યચિત્ ।
રોગી રોગાત્ પ્રમુચ્યેત બદ્ધો મુચ્યેત બન્ધનાત્ ॥

તથા પ્રત્યર્થિકૃત્યાભિર્મન્ત્રયન્ત્રાદિકિલ્વિષૈઃ ।
કિં પુત્ર બહુનોક્તેન સત્યં સત્યેન મે શપે ॥ ઇતિ ॥

ઇત્યાથર્વણશિરસિ સૂર્યતાપિનીયે પ્રથમઃ પટલઃ ।

દ્વિતીયઃ પટલઃ

સનત્કુમારો ભગવન્તં પિતરં પ્રણિપત્ય પપ્રચ્છ ॥

કથં ધ્યાનં કથં ન્યાસઃ કથં પૂજાવિધાનકમ્ ।
અર્ઘ્યદાનં કથં કાર્યં બ્રવીતુ ભગવાનિદમ્ ॥ ઇતિ ॥

તતો ભગવાન્ પિતામહ આહ-
યતવાક્કાયમનસઃ સૂર્યભક્તો બ્રહ્મચારી વ્રતધરઃ ષ॥

સમુદાયગુરું કૃધિ । ઉદ્યન્નદ્યમિનો ભજ । પિતા પુત્રેભ્યો યથા ।
દીર્ઘાયુત્વસ્ય હેશિષે । તસ્ય નો દેહિ સૂર્ય । ઇતિ દ્વ્યર્ચં મહામન્ત્રં
જપ્ત્વા પ્રત્યર્થિનો જયતિ । ઉદ્યન્નદ્યમિત્ર મહઃ । આરોહન્નુત્તરાં
દિવમ્ । હૃદ્રોગં મમ સૂર્ય । હરિમાણં ચ નાશય । શુકેષુ મે
હરિમાણમ્ । રોપણાકાસુ દધ્મસિ । અથો હારિદ્રવેષુ મે । હરિમાણં
નિદધ્મસિ । ઉદગાદયમાદિત્યઃ । વિશ્વેન સહસા સહ । દ્વિષન્તં મમ
રન્ધયન્ । મો અહં દ્વિષતો રથમ્ । ઉદ્યન્નદ્યેત્યયં તૃચો રોગઘ્નઃ
ઉપનિષદન્ત્યાર્ધર્ચશો દ્વિષં (?) ના (?) યો નઃ
શપાદશપત્ । યશ્ચ નઃ શપતઃ શપાત્ । ઉષાશ્ચ તસ્મૈ નિમ્રુક્
ચ । સર્વં પાપં સમૂહતામ્ । ઇત્યેકર્ચો રોગઘ્નઃ પ્રત્યર્થિહારી ॥

આકાશો વહ્નિના યુક્તો દીર્ઘાદ્યશ્ચ સબિન્દુકઃ ।
આદ્યોऽયમર્ણકોપિષ્ઠો દ્વિતીયેન દ્વિતીયકઃ ॥

તૃતીયેન તૃતીયઃ સ્યાત્ દ્વાદશેન તૃતીયકઃ ।
ભૂતેન પઞ્ચમઃ પ્રોક્તઃ ષષ્ઠઃ ષોડશતઃ સ્વરાત્ ॥

ષડર્ચોऽયં મહામન્ત્રઃ સર્વસિદ્ધિપ્રદાયકઃ ।
એતન્મન્ત્રં મયોદ્દિષ્ટં ગુહ્યાદ્ગુહ્યતમં મહત્ ॥

એતજ્જપ્ત્વા મહામન્ત્રં સર્વપાપૈઃ પ્રમુચ્યતે ।
પૂજયિત્વા વિવસ્વન્તમર્ઘ્યદાનં સમાચરેત્ ।
એવં યઃ કુરુતે પૂજાં મુચ્યતે સર્વકિલ્બિષૈઃ ॥

સર્વામશ્રુત ઇતિ ॥

ઇત્યાથર્વણશિરસિ સૂર્યતાપિનીયે દ્વિતીયઃ પટલઃ ।

તૃતીયઃ પટલઃ

અથ સૌરમનૂનિ પ્રવક્ષ્યામિ નિગમોદિતાનિ । ઘૃણિરિતિ દ્વે અક્ષરે ।
સૂર્ય ઇતિ ત્રીણિ । આદિત્ય ઇતિ ત્રીણિ । એતદ્વૈ સાવિત્રસ્યાષ્ટાક્ષરં પદં
શ્રિયાભિષિક્તમ્ । ય એવં વેદ । શ્રિયા હૈવાઽભિષિચ્યતે । સહ વા
એતસ્ય સ્વધા ન યજુષા ન સામ્નામર્થોઽસ્તિ । યસ્સાવિત્રં વેદ । અહો
નાહાશ્વથ્યઃ । સાવિત્રં વિદાઞ્ચકાર । તં હ વાગદૃશ્યમાનાભ્યુવાચ
। સર્વં બત ગૌતમો વદ । યસ્સાવિત્રં વેદેતિ । સ હોવાચ । સૈષા
વાગસીતિ । અયમહં સાવિત્રઃ । દેવાનામુત્તમો લોકઃ । ગુહ્યં મહો
બિભ્રદિતિ । એતાવદિહ ગૌતમઃ યજ્ઞોપવીતં કૃત્વાઽધો નિપપાત ।
નમો નમ ઇતિ । સ હોવાચ । મા ભૈષીર્ગૌતમ જિતો વૈ તે લોક ઇતિ ।
તસ્માદ્યે કેચ સાવિત્રં વિદુઃ । સર્વે તે જિતલોકાઃ । ઉદ્યન્નદ્ય મિત્ર
મહઃ । સપત્નાન્મે અનીનશઃ । દિવૈનાન્વિદ્યતા જહિ । નિમ્રોચન્નધરાન્
કૃધિ । ન્યાસોપયોગસ્તથૈવાર્ઘ્યદાને ચ પાદન્યાસ આદ્યોઽર્ધર્ચન્યાસો
દ્વિતીયરુક્ન્નસ (?) સ્તૃતીયસ્તૃચન્યાસશ્ચ બીજન્યાસો
હંસન્યાસ ઇતિ બહુધા વર્ણયન્તિ ॥

ઇત્યાથર્વણશિરસિ સૂર્યતાપિનીયે તૃતીયઃ પટલઃ ।

ચતુર્થઃ પટલઃ

અથ પૂજાવિધાનં વક્ષ્યે–
યન્ત્રસ્ય પૂર્વદ્વારે દ્વારશ્રિયૈ ક્ષેત્રપાલાય માયાયૈ નમ ઇતિ
દક્ષિણતો દ્વારશ્રિયૈ ગણેશાય માયાયૈ પ્રત્યક્તો દુર્ગાયૈ માયાયૈ
ઉદક્તો મહાલક્ષ્મ્યૈ માયાયૈ નમઃ । પૂર્વપત્રે સૂર્યાયાગ્નેયપત્રે
રવયે દક્ષિણે વિવસ્વતે નૈરૃતૌ ખગાય પશ્ચિમે વરુણાય
વાયવ્યે મિત્રાય સૌમ્યે આદિત્યાય ઈશાન્યે નમો મહસે ભાસ્કરાય નમ
ઇત્યથાષ્ટદલપૂજાદિત્યસવિતૃસૂર્યખગપૂષગભસ્તિમાર્તાણ્ડ-
જગચ્ચક્ષુભિરષ્ટભિર્જાતૈરથ
પીઠપૂજાધારશક્તિમૂલપ્રકૃતિકૂર્માનન્તવરાહપૃથિવી-
સુવર્ણમણ્ટપરત્નસિંહાસનૈર્ઙિન્તૈઃ
ધર્મજ્ઞાનવૈરાગ્યૈશ્વર્યૈર્નઞ્પૂર્વૈશ્ચ
ઙિન્તૈરૃગ્વેદાદિભિશ્ચતુર્ભિઃ
કૃતાદિભિશ્ચતુર્ભિર્મન્દારાદિભિઃ પઞ્ચભિ।
પીઠકલ્પમૂલકન્દનાળપદ્મપત્રકેસરકર્ણિકાસૂર્યમણ્ડલ-

સોમવહ્નિબ્રહ્મવિષ્ણુરુદ્રસત્વ
રજસ્તમાત્માન્તરાત્મા પરમાત્મભૂઃ પુરુષભુવઃ પુરુષસુવઃ
પુરુષભૂર્ભુવસ્સુવઃ પુરુષાદ્યૈર્ઙિન્તૈસ્તૃચેન
સર્વોપચારોપયોગસ્તેન સર્વાઘૌઘનિવૃત્તિઃ સિદ્ધ્યતીતિ ॥

ઇત્યાથર્વણશિરસિ સૂર્યતાપિનીયે ચતુર્થઃ પટલઃ ।

પઞ્ચમઃ પટલઃ
અથ યન્ત્રં પ્રવક્ષ્યામિ દેવતાસુ પ્રસાધનમ્ ।
યન્ત્રં વિના દેવતા ચ ન પ્રસીદતિ સર્વદા ॥

વૃત્તમાદૌ વિલિખ્ય સાષ્ટપત્રં તતસ્ત્રિકોણં વૃત્તં
ષડશ્રં વૃત્તયુગળં સાધુકોણં સમાલિખેદિતિ
। તત્રૈતા દેવતા આવાહ્ય દ્વાદશાવરણાનિ કુર્યાત્તત્ર
દેવતામાર્તાણ્ડાદિભાન્વાદિત્યહંસસૂર્યદિવાકરતપનભાસ્કરા ઙિન્તાઃ
પ્રથમાવરણે મિત્રાદયો દ્વાદશમન્ત્રાદ્યાઃ દ્વિતીયે સૂર્યોદયે
નવખેટસ્તૃતીયે ધાતા ધ્રુવસોમાનિલાનલપ્રત્યૂષપ્રભાસશ્ચતુર્થે
વીરભદ્રગિરિશશઙ્કરૈકપાદહિર્બુધ્ન્યાદીનાઃ
ભુવનાધિપતિવિશામ્પતિપશુપતિસ્થાણુભવાઃ પઞ્ચમે
ધાત્રર્યમાંશુમધ્યમણિભવેન્દ્રવિવસ્વત્પૂષગભસ્તિમાર્તાણ્ડજગચ્ચક્ષુષઃ
ષષ્ઠે અરુણસૂર્યવેદાઙ્ગભાન્વિન્દ્રરવિગભસ્તિયમસુવર્ણરિતો-
દિવાકરમિત્રવિષ્ણુમાઘાદિદ્વાદશમાસાધિપતયઃ
સપ્તમે અસિતાઙ્ગો રુરુશ્ચન્દ્રક્રોધોન્મત્તકપાલિભીષણસંહારાઃ
અષ્ટમે બ્રાહ્મ્યાદયઃ સપ્તમાતરો નવમે
ઇન્દ્રાદયોઽષ્ટૌ દશમે મેષાદયો દ્વાદશૈકાદશે
વજ્રશક્તિખડ્ગપાશાઙ્કુશગદાત્રિશૂલચન્દ્રમુસલપદ્માનિ દ્વાદશે
મધ્યે ભાસ્કરં ધ્યાયેદુપચારાન્ સમર્પ્યાર્ઘ્યાણિ દદ્યાત્ ભગવાન્ સુપ્રીતો
ભવેત્ ॥

ઇત્યાથર્વણશિરસિ સૂર્યતાપિનીયે પઞ્ચમઃ પટલઃ ।

ષષ્ઠઃ પટલઃ
અથ યન્ત્રે બીજોદ્ધારં પ્રવક્ષ્યામિ દેવતાસન્નિધયે
વૃત્તભાનુમતીદ્વ્યર્ણમુદ્ધરેત્કમલાષ્ટપર્ણેષુ દણ્ડ એષઃ
પિઙ્ગાક્ષપ્રચણ્ડક્ષેત્રપાલગણપતિદુર્ગાલક્ષ્મ્યો ઙેન્તા અષ્ટૌ

(?) સ્યાદ્વર્ણં બીજકાદ્યાઃ ષટ્કોણેષુ તારયા હંસસ્સોહમિતિ
ચતુરાશાસુ માયામઙ્કુશં ચ માખ (?) પ્વષ્ટસુ
તત્તદાદ્યર્ણમધ્યે તૃતીયનામાદિકમિતિ દેશિકોક્ત્યા સર્વં વિજ્ઞાય
સાધકઃ સિદ્ધ્યતિ ॥

ગુરુભક્તાય શાન્તાય પ્રદેયં નિયતાત્મને ।
ન ચ શુશ્રૂષવે વાચ્યં હૈતુકાય કદાચન ॥

દેશિકોક્તવિધાનેન યન્ત્રે દેવં પ્રપૂજયેત્ ।
અર્ઘ્યદાનં તતઃ કુર્યાદ્ભાનુરર્ઘ્યપ્રિયઃ સદા ॥

દેશિકોક્તેન મન્ત્રેણ તૃચેન ચ યથાવિધિ ।
સાધકઃ સાધયેત્સર્વમિહ લોકે પરત્ર ચ ॥

કિં પુત્ર બહુનોક્તેન સત્યં સત્યેન મે શપે ।
પ્રત્યક્ષદૈવતં સૂર્યઃ પરોક્ષં સર્વદેવતાઃ ॥

સૂર્યસ્યોપાસનં કાર્યં ગચ્છેત્ સૂર્યꣳ સદમ્ ।
ગચ્છેત્ સૂર્યꣳ સદં ગચ્છેત્ સૂર્યસꣳ સદમિતિ ॥

ઇત્યાથર્વણશિરસિ સૂર્યતાપિનીયે ષષ્ઠઃ પટલઃ

ઇતિ સૂર્યતાપિન્યુપનિષત્ સમાપ્તા ।

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Proofread by Sunder Hattangadi

*Suryatapinyupanishad*

pdf was typeset on December 3, 2021

Please send corrections to *sanskrit@cheerful.com*